International Journal of Sanskrit Research 2020; 6(1): 70-72

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(1): 70-72
© 2020 IJSR
www.anantaajournal.com
Received: 10-11-2019
Accepted: 12-12-2019

**डॉ. टि.सिद्धलिङ्गेश्वरय्य**
अद्वैतवेदान्तविभागः,
रष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः,
आंध्र प्रदेश, भारत

**Corresponding Author:**
**डॉ. टि.सिद्धलिङ्गेश्वरय्य**
अद्वैतवेदान्तविभागः,
रष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः,
आंध्र प्रदेश, भारत

# शतश्लोक्यां गुरुमाहात्म्यम्

**डॉ. टि.सिद्धलिङ्गेश्वरय्य**

**प्रस्तावना**

आचार्यवान् पुरुषोवेद, तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्, समित्पाणिः श्रोत्रियं ब्रह्मनिष्टम् इत्यादि श्रुतयः आत्मज्ञानार्थं गुरोः आवश्यकतां प्रतिपादयन्ति। तथैव—

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।। [1]

इति स्मृतिरपि तत्वदर्शिनः गुरोः प्रणिपातादि शिष्यकर्तव्यतां प्रतिपादयति।अतःगुरुरूप पुरुष सहायः (गुरुकृपा) तत्वज्ञानार्थिनः अत्यावश्यकः इति प्रतिभाति।स्वयं जगद्गुरवः श्री शङ्कर भगवत्पादाः स्वीय शतश्लोकी प्रकरण ग्रन्थे गुरोः माहात्म्यं विभिन्नशैल्या आदौ प्रत्यपादयन्ति तथाहि-

दृष्टान्तो नैव दृष्टस्त्रिभुवनजठरे सद्गुरोर्ज्ञानदातुः
स्पर्शश्चेत्तत्र कल्प्यः स नयति यदहो स्वर्णतामश्मसारम्।
न स्पर्शत्वं तथापि श्रितचरणयुगो सद्गुरुः स्वीयशिष्ये
स्वीयं साम्यं विधत्ते भवति निरुपमस्तेन चालौकिकोऽपि।। [2]
अस्य गुरुमाहात्म्यस्य विवरणम् अत्र विचार्यते।

संसारेऽस्मिन् भवभोगबन्धननामके प्रपाते पतितान् लोकान् उद्धर्तुं तथैव भवबन्धनात् विमोचनार्थञ्च जनसामान्योद्धरणाय च सर्वदा यतमानः ज्ञाननामकम् अस्त्रं गृहीत्वा लोककल्याणं करोति गुरुः। तस्मात् गुरुसमानः नान्यः भवितुमर्हति जगत्यस्मिन्। तस्माद्गुरुः उपमातीतः भवति।

ज्ञाननामकेन स्पर्शमणिना सर्वत्र ज्ञानं प्रसारयन् लोकेषु विद्यमानं अज्ञानस्वरूपान्धकारं दूरीकुर्वन् सर्वत्र ज्योतीरूपज्ञानं प्रसारयन् सर्वान् अन्धकारात् विमोचयति गुरुः। लौकिकालौकिकज्ञानावगमाय सृष्टितत्त्वस्य वास्तविकतां च प्रबोधयति।

विमर्शः

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।
गुरुस्साक्षात् परं ब्रह्म तस्मै श्री गुरवे नमः।।[3]

इति प्रसिद्धःश्लोकः। गुरुः त्रिमूर्तिस्वरूपः इति अस्मात् श्लोकात् ज्ञायते। कथं गुरोः त्रिमूर्तिस्वरूपत्वम् इति आलोचयामः। सृष्टिकर्ता ब्रह्मा, स्थितिकर्ता पालनकर्ता च श्री महाविष्णुः, अन्ते लयकर्ता ईश्वरः इति विवेकः। जन्मना जायते जन्तुः इति वचनानुसारेण उत्पन्नः मनुष्यो वा भवतु सः जन्तुरेव। जन्तूनां नरजन्म दुर्लभमिति [4] वचनानुसारेण जन्तुषु नरःश्रेष्टः। आद्यप्राणशरीरसम्बन्धेन प्राणिनः उत्पत्तिरिति स्थितिः। तादृशोत्पत्तिर्हेतुर्भवति प्रजापतिः ब्रह्मा।तद्वदेवमातृ-पितृ-अचार्यसकाशादधीतविद्यः सःनूतनं जन्म प्राप्य ज्ञानवान् लोकोपकारी भवति, तादृशज्ञानप्रदायकः गुरुः पुनरुत्पत्ति हेतुर्भवतीति कृत्वा ब्रह्मणा सदृशः इति गुरुं मनसि निधाय श्रुतिर्वदति गुरुर्ब्रह्मा इति।

अयं गुरुः विष्णुस्वरूपः अथवा विष्णुतुल्यः। उत्पन्नानां जन्तूनां पालको भवति विष्णुः। लोकेऽपि जीवनाधारत्वेन विद्या अपेक्षिता वर्तते। अधीतविद्यः शिष्यः चिन्तयति,विद्यानुसारेण उद्योगं संप्राप्य निर्वाहादिकं कृत्वा स्वसंसारं निर्वहणीयमिति। सर्वमपि विद्याधीनम्। विद्या विहीनः पशुभिस्समानः इति वाणी वदति।तादृश विद्याद्वारैव किल लोकः जीवति। तस्मात् जीवनाधारत्वेन अपेक्षित विद्याप्रदायकत्वेन च पालनकर्ता गुरुः महाविष्णुस्वरूपः इति ज्ञायते।

शिवः मोक्षप्रदायकः। ज्ञानादेवतु कैवल्यम् [5] इति श्रुतिः वदति। विद्यायाः सारः ज्ञानमेव। सारभूतायाः विद्यायाः मोक्षप्रदायकत्वसिद्धेः तादृशज्ञानबोधकः गुरुः शिववत् मोक्षप्रदायकः। वेदान्तिनाम् मते तुरीयं यद् ब्रह्मचैतन्यं तदेव ज्ञानस्वरूपम्। ज्ञानेनैकेनामृतत्वमानशुः [6] इति श्रुति सहस्रं वदति।विधिनिरूपणावसरे गुरुमुखाधीनाध्ययनद्वारा प्राप्ता विद्या एव मोक्षहेतुः भवति इत्यतः "श्रोतव्यो, मन्तव्यो, निदिध्यासितव्यः" इत्यत्र विधिच्छायाणि वचनानि गुरुमुखाधीनाध्ययनमेव मोक्षहेतुरिति निगदन्ति।तादृश तुरीयब्रह्मस्वरूपः गुरुः इत्यस्य श्लोकस्य सारः। एवं सृष्टिविषये प्रजापति तुल्यो वा, पालनविषये महाविष्णु तुल्यो वा, मोक्षप्रदाने शिवतुल्यो वा अन्यः नास्तीति गुरोः निरुपमत्वं सिध्यति। एवं गुरोःविषये उपमानमेव नास्तीति अस्य श्लोकस्य सारः प्रकटितो भवति।

**अनुसन्धानम्**

गहनविषयः दृष्टान्तद्वारा स्पष्टीक्रीयते बोध्यते च। लोके एकैकस्य पदार्थस्य तत्त्वनिर्धारणार्थं तत्सजातीयवस्त्वन्तरम् उपलभ्यते।यथा व्याप्तिग्रहणसमये महानसः परन्तु आत्मतत्त्वबोधकः गुरुः दृष्टान्तशून्यः। अधीतविद्यः शिष्यः पश्चात् गुरुरेव भवति।स्वीयशिष्ये स्वीयसाम्यं गुरुः विधत्ते।तस्मात् ब्रह्मविद्या गुरुमुखादेव अवगन्तव्या।स्वयं पठिता विद्या प्रकाशिका न भवतीति अप्पय्यदीक्षितैः उक्तमपि अत्र अवगन्तव्यम्। त्रिमूर्तिसदृशः गुरुः भवति।परन्तु गुरुसदृशाः त्रिमूर्तयः न भवन्ति।तिसृभिर्मूर्तिभिः क्रियमाणं कार्यं एकः गुरुः करोति, परन्तु एकेन गुरुणा कृतं मूर्तित्रयेणापि कर्तुं नैव शक्यतेति कृत्वा गुरुः निरुपमः इति अस्य श्लोकस्य अभिप्रायः। अत्र नहि ज्ञानेन सदृशं,[7] ज्ञानीत्वात्मैवमेमतम् [8] इति भगवद्गीतायाः सोरोऽपि प्रदर्शितः।

यद्वच्छ्रीखण्डवृक्षप्रसृतपरिमलेनाभितोऽन्येऽपि वृक्षाः
शश्वत्सौगन्ध्यभाजोऽप्यतनुतनुभृतां तापमुन्मूलयन्ति।
आचार्याल्लब्धबोधा अपि विधिवशतः सन्निधौ संस्थितानां
त्रेधा तापं च पापं सकरुणहृदयाः स्वोक्तिभिः क्षालयन्ति।।[9]

यथा वृक्षराजः चन्दनः स्वसुगन्धेन स्वपरितः विद्यमानान् सुगन्धयति, यथा दीपः स्वप्रकाशेन स्वं परितः विद्यमानमन्धकारं निवारयति, तथैव गुरुरपि स्वदिव्यज्ञानेन दीनदलितशोषितदरिद्रनारायणानां दौर्भाग्यं भाग्यरूपेण परिवर्त्य दुःखितान् जनान् तोषयति। पुनश्च जनानां सन्तापादीन् स्वज्ञानोपासनकर्मबलेन परिहरति। एवमेव तापोपशमनमार्गान्श्च प्रबोधयति। तादृशस्य गुरोः प्रभावः, कृपाच यदि भवेत्तर्हि सर्वदा मोमुदिताः भवन्ति।लोके चन्दनं परमौषधम् इत्युच्यते। शरीरे विद्यमानानां व्याधीनां निवारकं चन्दनं न केवलं व्याधिनिवारकम्, शरीरस्य दुर्गन्धनिवारणपूरकं आह्लादजनकं च भवति। वैदिकेऽपि कर्मणि भगवतः पूजाराधानसमये दिव्यश्रीपरिमलगन्धान् धारयामीति प्रयोगः दृश्यते। तथा हि देवताराधना देवस्य कृते कृतज्ञतासमर्पणे प्राचीनैः महर्षिभिः अनुसृता पद्धतिः। देवर्णविमोचनार्थं भगवता दत्तवस्तुभिः पूजाद्वारेण तस्यैव समर्पणम् अनादिकालतः अनादिसम्प्रदायविद्धिः क्रियमाणं कर्म। सर्वमपि पदार्थजातं भगवता दत्तं पुनः भगवते निवेद्यते। तस्मिन् सुगन्धयुक्तगन्धोऽपि अन्यतमः। अन्तःकरणे विद्यमानस्य दुर्गन्धस्य निवारणार्थं ज्ञानमपेक्षितं वर्तते। तादृशज्ञानस्य दाता भवति गुरुः। गुरुः अज्ञान निवर्तकः, ज्ञानदाता च।

अज्ञानतिमिरान्धस्य ज्ञानाञ्जन शलाकया।
चक्षुरून्मीलितं येन तस्मै श्री गुरवे नमः।।

तद्वत् बहिर्विद्यमानदौर्गन्धनिवारणपुरस्सरं यथा सुगन्धः उपयोगी तद्वत् अन्तर्विद्यमानाज्ञाननिवर्तकत्वात् सुगन्धापेक्षया अधिकं कार्यं गुरुः करोतीति कृत्वा गुरुः सर्वोत्कृष्टः। तादृशः अन्यः प्रपञ्चे नास्तीत्युक्तौ अतिशयोक्तिः न भवति। अयं विषयः अत्र भगवता सुष्ठु प्रतिपादितः अस्मिन् श्लोके। एवमेव चन्दनं शरीरे औष्ण्यं निवारयति। तापनिवारकम् इति लोके प्रसिद्धिः शैत्यपावनत्वप्रदानेन। तद्वत् पावनः गुरुः अन्तर्करणस्थं तापत्रयं दूरीकृत्य करुणा हृदयः सूक्तिभिः क्षालयतीति अस्य श्लोकस्य तात्पर्यार्थः।

**अनुसन्धानम्।**

गुरोः सन्निधानमात्रेण शिष्यः कृतार्थः भवतीति सारः।
गङ्गापापं शशीतापं दैन्यं कल्पतरुस्तथा।
शापं तापं च दैन्यं च घ्नन्ति सन्तो महाशयाः।।इति प्रसिद्धम् सुभाषितम्।

चन्दनवृक्षः स्व समीपस्थं सर्वं प्रदेशं सुगन्धमयं कृत्वा तापंच विनाश्य आह्लादमयं करोति। तद्वत् महाशयाः गुरवः स्वसमीपस्थं शिष्यं विद्याप्रदानेन अज्ञानदूरीकरणे च मोक्षभाजं कुर्वन्तीत्यर्थः।

**सन्दर्भ ग्रन्थ**


1. भ.गीता-34
2. शतश्लोकी-1
3. शुक्रनीतिः 2.36
4. वि.चू.1
5. यो.त.उ 16
6. कै.उ.
7. भ.गीता 4.38
8. भ.गीता 7.18
9. शतश्लोकी- 2